लौहजालमये अङ्गरक्षणसाधने वर्म्मभेदे अङ्गरक्षणसाधनमात्रे त्रि० । भावे ल्युट् । देहत्राणे न० ।

**अङ्गराग** पु० अङ्गं रज्यतेऽनेन रन्ज–करणे घञ् । अङ्गलेपने कुङ्कुमादौ । भावे घञ् । अङ्गस्य विलेपने पु० ।

**अङ्गराज** पु० अङ्गानां जनपदानां राजा अच् समा० । अङ्गदेशाधिपे, कर्णे च तत्कथा अङ्गाधिपशब्दे दृश्या । अङ्गनृपादयोऽप्यत्र ।

**अङ्गराज्** पु० अङ्गेषु तन्नामकदेशेषु राजते राज–क्विप् ७त० । अङ्गदेशाधिपे कर्णे, तद्देशराजमात्रे च ।

**अङ्गरुह** न० अङ्गे रोहति रुह–क्विप् ७त० । देहजे लोमकेशादौ । "विहङ्गराजाङ्गरुहैरिवायतैरिति" माघः ।

**अङ्गलेप** पु० अङ्गं लिप्यतेऽनेन लिप–करणे घञ् ६त० । अङ्गरागद्रव्ये । भावे घञ् ७त० । देहे चन्दनाद्यनुलेपने ।

**अङ्गव** न० अङ्गे स्वावयवे वाति अन्तर्भवति अतिशोषणात् सङ्कुचिताङ्गमिव भवति वा–ड ७त० । शुष्कफले ।

**अङ्गविकल** त्रि० अङ्गेन विकलः । देहव्याकुलतायुक्ते ।

**अङ्गविकृति** पु० वि–कृ–क्तिन् अङ्गस्य विकृतिश्चालनादिर्यस्मात् ५त० । (मृगीनाडा) इति ख्याते अपस्माररोगे । ६त० । अङ्गस्य विकारे स्त्री ।

**अङ्गविक्षेप** पु० वि–क्षिप–घञ् अङ्गस्य विक्षेपः चालनं यत्र ब० । अङ्गुल्यादिविन्यासभेदेन देहचालनरूपे नृत्ते । तद्भेदादि यथा । "देहरुच्या प्रतीतो यस्तालमानसमाश्रयः । सविलासोऽङ्गविक्षेपो नृत्यमित्यभिधीयते । ताण्डवञ्च तथा लास्यं द्विविधं नृत्यमुच्यते । पेवलिर्बहुरूपञ्च ताण्डवं द्विविधं मतम् । अङ्गविक्षेप बाहुल्यं तथाभिनयशून्यता । यत्र सा पेवलिस्तस्या देशीति नाम लोकतः । छेदनं भेदनं यत्र वहुरूपा सुखाबली । ताण्डवं बहुरूपन्तत् दारुणात् गलमूर्द्धतः । छुरितं यौवतञ्चेति लास्यं द्विविधमुच्यते । यत्राभिनयभावाद्यै रसैराश्लेषचुम्बनैः । नायिकानायकौ रङ्गे नृत्यतश्छुरितं हि तत् । मधुरं बद्धलीलाभिर्नर्त्तकीभिर्यत्र नृत्यते वशीकरणविद्याभं तल्लास्यं यौवतं मतम् । गेयादुत्तिष्ठते वाद्यं वाद्यादुत्तिष्ठते लयः । लयतालसमारब्धं ततो नृत्यं प्रवर्त्तते इति सङ्गीतदामोदरः । भावे घञ् । अङ्गचालने ।

**अङ्गविद्या** स्त्री अङ्गरूपा व्याकरणादिशास्त्ररूपा विद्या ज्ञानसाधनम् । ज्ञानसम्पादके व्याकरणादिशास्त्रे । प्रश्नकाले अङ्गानां देहावयवानां चेष्टादिना शुभाशुभबोधके ज्योतिरङ्गे शास्त्रे च । सा च विद्या बृहत्संहितायां दर्शिता यथा "अथाङ्गान्यूर्वोष्ठस्तनवृषणपादं च दशना भुजौ हस्तौ गण्डौ कचगलनखाङ्गुष्ठमपि यत् । सशङ्खं कक्षांसश्रवणगुदसन्धीति पुरुषे, स्त्रियां भ्रूनासास्फिग्वलिकटिसुलेखाङ्गुलिचयम् ॥ जिह्वा ग्रीवा पिण्डिके पार्ष्णियुग्मं जङ्घे नाभिः कर्णपाली कृकाटी । वक्त्रं पृष्ठं जत्रुजान्वस्थिपार्श्वं हृत्तात्वक्षी मेहनोरस्त्रिकं च ॥ नपुंसकाख्यं च शिरो ललाटम् आस्वाद्यसंज्ञैर्–परैश्चिरेण । सिद्धिर्भवेज्जातु नपुंसकैर्नो रूक्षक्षतैर्भग्नकृतैश्च पूर्वैः ॥ स्पृष्टे वा चालिते वापि पादाङ्गुष्ठेऽक्षिरुग् भवेत् । अङ्गुल्यां दुहितुः शोकं शिरोघाते नृपाद्भयम् ॥ विप्रयोगमुरसि स्वगात्रतः कर्पटाहृतिरनर्थदा भवेत् । स्वात्मियाभिरभिहत्य कर्पटं पृच्छतश्चरणपादयोर्जितः ॥ पादाङ्गुष्ठेन विलिखेद्भूमिं चेत्क्षेत्रोत्थचिन्तया । हस्तेन पादौ कण्डूयेत्तस्य दासीमया च सा ॥ तालभूर्जपटदर्शनेऽंशुकं चिन्तयेत्कचतुषास्थिभस्मगम् । व्याधिराश्रयति रज्जुजालकं वल्कलं च समवेक्ष्य बन्धनम् ॥ पिप्पलीमरिचशुण्ठिवारिदैर्लोध्रकुष्ठवसनाम्बुजीरकैः । गन्धमांसिशतपुष्पया वदेत् पृच्छतस्तगरकेण चिन्तनम् । स्त्रीपुरुषदोषपीडितसर्वाध्वसुतार्थधान्यतनयानाम् । द्विचतुःषट्पदचितीनां विनाशतः कीर्त्तितैर्दृष्टैः ॥ न्यग्रोधमधूकतिन्दुकजम्बूप्लक्षाम्रबदरिजातिफलैः । धनकनकपुरुषलोहांशुकरूप्योदुम्बराम्रैरपि करगैः ॥ धान्यपरिपूर्णपात्रं कुम्भः पूर्णः कुटुम्बवृद्धिकरौ । गजगोशुनां पुरीषं धनयुवतिसुहृद्विनाशकरम् ॥ पशुहस्तिमहिषपङ्कजरजतव्याघ्रैर्लभेत सन्दृष्टैः । अविधननिवसनमलयजकौशेयाभरणसङ्घातम् ॥ पृच्छा वृद्धश्रावकसुपरिव्राड्दर्शने नृभिर्विहिता । मित्रद्युतार्थभवा गणिकानृपसूतिकार्थकृता ॥ शाक्योपाध्यायार्हतनिर्ग्रन्थिनिमित्तनिगमकैवर्त्तैः । चौरचमूपतिवणिजां दासयोधापणस्थवध्यानाम् ॥ तापसे शौण्डिके दृष्टे प्रोषितः पशुपालनम् । हृद्गतं पृच्छकस्य स्यादुञ्छवृत्तौ विपन्नता ॥ इच्छामि प्रष्टुं भण पश्यत्वार्यः समादिशेत्युक्ते । संयोगकुटुम्बोत्था लाभैश्वर्योद्गता चिन्ता ॥ निर्द्दिशेति गदिते जयाध्वगा, प्रत्यवेक्ष्य मम चिन्तितं वद । आशु सर्वजनमध्यगं त्वया दृश्यतामिति च बन्धुचौरजा ॥ अन्तःस्थेऽङ्गे स्वजन उदितो वाह्यजे बाह्य एवं पादाङ्गुष्ठाङ्गुलिकलनया दासदासीजनः स्यात् । जङ्घे प्रेष्यो भवति भगिनी नाभितो हृत्स्वभार्या पाण्यङ्गुष्ठाङ्गुलिचयकृतस्पर्शने